# A-II/1/2410/ 23

## चतुर्थसत्रार्द्धम्

## प्रथमपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**क. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. शब्दग्राहकं प्रमाणं किम्?
2. शब्दाभिव्यञ्जकः कः?
3. अर्थबोधकत्वं कस्य धर्मः?
4. श्रोत्रं नाम किम्?
5. स्फोटः शब्द इति के वदन्ति?
6. अपूर्वसद्भावे किं प्रमाणम्?
7. न्यायमते शब्दः नित्यः उत अनित्यः उत क्षणिकः?
8. का नाम प्रत्यभिज्ञा?
9. परमापूर्वं कुत्र उत्पद्यते?
10. शब्दत्वजातौ किं प्रमाणम्?
11. चित्रायागस्य फलं किम्?

**अथवा**

निषेधलक्षणं किम्?

12. भाट्टमते कति प्रमाणानि?

**अथवा**

प्रयाजानामङ्गत्वे किं प्रमाणम्?

13. राजसूयविधिवाक्यं किम्? तस्य फलं किम्?

**अथवा**

सिद्धान्ते काठकसमाख्यायाः अर्थः कः?

14. अभिक्रमणस्य प्रयाजाङ्गत्वे किं प्रमाणम्?

**अथवा**

वेदस्य पौरुषेयत्वसाधकानुमानं किम्?

15. किं नाम सान्नाय्यम्?

**अथवा**

शब्दस्य नित्यत्वं के स्वीकुर्वन्ति?

**ख. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. "शब्दः अनित्यः" – इति सप्रमाणं विमृश्य लिखत।

17. शब्दस्य युगपदनेकदेशोपलम्भे कारणं स्पष्टयत।

18. शब्दस्य प्रत्यक्षत्वमाक्षिप्य समाधत्त।

**अथवा**

क्षणभङ्गवादस्वरूपं विमृश्य लिखत।

19. शब्दत्वजातौ प्रमाणं प्रदर्शयत।

**अथवा**

अन्विताभिधानवादे दोषानुद्भावयत।

20. वाक्यार्थस्य लक्ष्यत्वे युक्तीः प्रदर्शयत।

**अथवा**

वेदापौरुषेयत्वे युक्तीः प्रदर्शयत।

**ग. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. धर्मलक्षणं सप्रसङ्गं व्याख्यात।

**अथवा**

जिज्ञासासूत्रं यथाग्रन्थं व्याख्यात।

# A-II/2/2411/ 23

## चतुर्थसत्रार्द्धम्

## द्वितीयपत्रम्

## मीमांसा

**समय: घण्टात्रयम्** **पूर्णाङ्काः 80**

**क. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. काम्येष्टयः काः?
2. 'तदाख्यो वा प्रकरणोपपत्तिभ्याम्' सूत्रार्थः कः?
3. गुणाभिधानाधिकरणस्य विषयसंशयसङ्गती: प्रदर्शयत।
4. इन्द्रपीताधिकरणे द्वितीयः पूर्वपक्षः कः?
5. का नाम समाख्या?
6. स्थानप्रमाणं यथाग्रन्थं व्याख्यात।
7. उपक्रमाधिकरणविषयवाक्यार्थं वर्णयत।
8. किं नाम लिङ्गम्?
9. 'वेदो वा प्रायदर्शनात्' सूत्रार्थः कः?
10. गुणमुख्यव्यतिक्रमाधिकरणे कः संशयः?
11. किं नाम प्रकरणम्?

**अथवा**

प्राप्ताप्राप्तबाधयोः किं वैलक्षण्यम्?

12. बलाबलाधिकरणसूत्रं लिखत।

**अथवा**

सामर्थ्यं लिङ्गमिति कस्य सिद्धान्तः?

13. गुणमुख्याधिकरणे का सङ्गतिः?

**अथवा**

अधिकरणाङ्गानि कानि?

14. 'ग्रहणाद्वा अपनीतं स्यात्' सूत्रार्थ कः?

**अथवा**

'कर्तृकरणे कृता बहुलम्' सूत्रार्थः कः?

15. विध्यनुवादयोः वैलक्षण्यं प्रदर्शयत।

**अथवा**

संगतेः लक्षणं किम्?

**ख. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. इन्द्रपीताधिकरणसारं वर्णयत।

17. भक्षपेटिकाविषयमुपस्थापयत।

18. श्रुतिलिङ्गयोः विरोधं सोदाहरणं व्याख्यात।

**अथवा**

गुणमुख्यव्यतिक्रमाधिकरणे भाष्यकारमतं व्याख्यात।

19. अङ्गबाहुल्येन प्रधानोत्पत्तिविधिनिर्णयं वर्णयत।

**अथवा**

'अस्ति प्रकरणं नाम चतुर्थं प्रमाणम्' साधयत।

20. वाक्यप्रकरणयोः बलाबलं विवेचयत।

**अथवा**

श्रुत्यादीनां प्राबल्यदौर्बल्ये क्वचित् वैपरीत्यं विवृणुत।

**ग. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. कानि श्रुत्यादिप्रमाणानि? सोदाहरणपूर्वक विवृणुत।

**अथवा**

प्रमाणानां बलाबलविचारः स्वाधीतग्रन्थदिशा प्रदर्शयत।

# A-II/3/2412/ 23

## चतुर्थसत्रार्द्धम्

## तृतीयपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**क. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. विभक्तयः कति ? काश्च ताः ?
2. विभक्त्यर्थस्य कुत्र अन्वयः ?
3. कात्यायनमते प्रथमायाः कोऽर्थः ?
4. पाणिनिमते प्रथमायाः कोऽर्थः ?
5. कर्मसंज्ञाविधायकसूत्रं किम् ?
6. द्वितीयाविभक्तिविधायकसूत्रं किम् ?
7. कयोरर्थयोस्तृतीया विधीयते ?
8. द्विकर्मकप्रयोगस्य उदाहरणं किम् ?
9. चैत्रो ग्रामं गच्छतीत्यस्य शाब्दबोधप्रकारः कः ?
10. "रुच्यर्थानां प्रीयमाण" इत्यस्य उदाहरणं किम् ?
11. षष्ठ्याः कोऽर्थः ?

**अथवा**

अधिकरणत्वं कस्यार्थः ?

12. शाब्दबोधे मुख्यविशेष्यत्वं कस्य ?

**अथवा**

किं नाम अपादानत्वं ?

13. किं नाम देवतात्वम् ?

**अथवा**

देवतात्वं कया विभक्त्या बोध्यते ?

14. अधिशीङ्स्थासां कर्मेति सूत्रस्य कोऽर्थः?

**अथवा**

उभसर्वतसोः कार्येत्यादिवार्तिकं किम्?

15. चतुर्थीविधायकं सूत्रं किम्?

**अथवा**

किं नाम करणत्वम्?

**ख. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. संबोधनविभक्त्यर्थभूतमभिमुखत्वं किंरूपमिति निरूपयत।

17. पाणिनिमतेन प्रथमार्थं तस्य भावनान्वयं च उपादयत।

18. गतिबुद्धिसूत्रं ------- तदर्थञ्च सोदाहरणं लिखत।

**अथवा**

न विभक्तौ लक्षणेत्यस्य कथं सिद्धिरिति उपपादयत।

19. किं नाम कर्तृत्वमिति विचारयत।

**अथवा**

सोदाहरणपूर्वकं करणत्वं स्वाधीतग्रन्थदिशा विचारयत।

20. संप्रदानत्वनिर्वचनं यथाग्रन्थं दर्शयत।

**अथवा**

कर्तृकर्मणोः कृतीति सूत्रार्थं सपदकृत्यं प्रतिपादयत।

**ग. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. स्तोकं पचति, मृदु पचतीत्यादौ कथं द्वितीयेति विचारयत।

**अथवा**

संप्रदानत्वपरिष्कारं यथाग्रन्थं निरूपयत।

# A-II/4/2413/ 23

## चतुर्थसत्रार्द्धम्

## चतुर्थपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**क. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

**अर्थविवरणं कुरुत।**

1. अनतिदृश्यम् किम्?
2. होमः कः?
3. परिधानीया इत्यस्य कोऽर्थः?
4. अत्यादधाति इत्यनेन किं ज्ञायते?
5. वृषण्वा इत्यस्य कोऽर्थः?
6. अभिक्रामम् इत्यस्य कोऽर्थः?
7. अविदधदिव इत्यनेन किम् उच्चते?
8. प्रक्रमयति इत्यस्य कोऽर्थः?
9. इडा इत्यस्य कोऽर्थः?
10. विधूननम् इत्यस्य तात्पर्यं किम्?
11. उपांशुस्वरः इत्यनेन किमुच्यते?

**अथवा**

प्रयोगविधिः कः?

12. अभिचारः कः?

**अथवा**

अधिकारविधिः कः?

13. वाक्यम् किम्?

**अथवा**

जिह्मशब्देन कस्य ग्रहणम्?

14. पौर्णमासी इत्यस्य शब्दार्थः कः?

**अथवा**

कल्पः इत्यस्य कोऽर्थः?

15. गुणविधिः कः?

**अथवा**

पिण्डपितृयज्ञः कः?

**ख. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. अनूयाजार्थे प्राची उल्मुके उदूहतीति वाजसनेयकं विवेचयत।

17. चतुर्होत्रा पौर्णमास्यां हवींष्यासादयेत् पञ्चहोत्रा अमावास्यायाम् इति प्रतिपादयत।

18. आधारयोर्वदत्यृजू प्राञ्चौ होतव्यौ तिर्यञ्चौ वा व्यतिषक्तावव्यतिषक्तौ वा इति निरूपयत।

**अथवा**

भुवनमसीत्यग्रेण ध्रुवां जुहूं वाऽञ्जलिं कृत्वा जुह्वेहीति जुहूमादत्ते उपभृदेहीति उपभृतमिति व्याख्यात।

19. आग्नेयस्सौम्यश्चाज्यहविषावाज्यभागौ चतुर्गृहीताभ्यामिति व्याख्यात।

**अथवा**

आज्यहविरूपांशुयाजः पौर्णमास्यामेव भवति वैष्णवोऽग्नीषोमीयः प्राजापत्यो वा इति व्याख्यात।

20. दक्षिणाग्नौ अन्वाहार्यं महान्तमपरिमितमोदनं पचति। क्षीरे भवतीत्येके। तमभिधार्यानभिधार्य वोद्धास्यान्तर्वेद्यासाद्य इति व्याख्यात।

**अथवा**

पूर्ववद्ध्रुवामाप्याय्य देवा गातुविद इत्यन्तर्वेद्यूर्ध्वस्तिष्ठन् ध्रुवया समिष्टयजुर्जुहोति इति व्याख्यात।

**ग. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. विधेः त्रैविध्यं स्वाधीतग्रन्थदिशा प्रतिपादयत।

**अथवा**

श्रौतसूत्रस्य महत्त्वं प्रतिपादयत।

# A-II/5/2414/ 23

## चतुर्थसत्रार्द्धम्

## पञ्चमपत्रम्

## मीमांसा

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**क. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. मीमांसाशास्त्रे षष्ठाध्याये किं विचारितम्?
2. ब्राह्मणस्य उपनयनं कदा?
3. आधानस्य उत्पत्तिवाक्यं किम्?
4. रथकारो नाम कः?
5. निषादस्थपतिपदे कः समासः? कुतः?
6. प्रसंगसङ्गतेः उदाहरणं किम्?
7. तन्त्रं किम्?
8. श्येनेनाभिचरन् यजेतेत्यत्र नामत्वे किं निमित्तम्?
9. प्रतिपदाधिकरणसिद्धान्तः कः?
10. आर्थीभावनायाः साध्यं किम्?
11. विकल्पस्वीकारे कति दोषाः?

**अथवा**

मण्डनमिश्रमते धात्वर्थः कः?

12. पार्थसारथिमते आख्यातार्थः कः?

**अथवा**

किं नाम क्रत्वर्थत्वम्?

13. किं नाम पुरुषार्थत्वम्?

**अथवा**

को नाम यागः?

14. को होमः ?

**अथवा**

किं नाम देवतात्वम् ?

15. किं नाम प्रतिपत्तिकर्म ?

**अथवा**

अर्थापत्तिः प्रमाणमिति के वदन्ति ?

**ख. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. तमसः अतिरिक्तद्रव्यत्वं साधयत।

17. अर्थापत्तेः अनुमानाद्भेदं साधयत।

18. अनुपलब्धेः अतिरिक्तप्रमाणत्वं साधयत।

**अथवा**

अङ्गत्वलक्षणलक्ष्याणि निरूपयत।

19. अरुणाधिकरणमारचयत।

**अथवा**

वैश्वदेवपदस्य नामधेयत्वं साधयत।

20. अग्निहोत्रपदस्य नामधेयत्वं निरूपयत।

**अथवा**

स्थानं सोदाहरणं सभेदं निरूपयत।

**ग. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. प्रत्यक्षज्ञानकारणीभूतसन्निकर्षान् निरूपयत।

**अथवा**

अङ्गताबोधकप्रमाणानां प्राबल्यदौर्बल्यविचारमुपस्थापयत।